# ॥ શ્રીવેઙ્કટેશકવચસ્તોત્રમ્ ॥

.. shrIve NkaTeshakavachastotram ..

sanskritdocuments.org

September 11, 2017

# .. shrIve NkaTeshakavachastotram ..

# ॥ શ્રીવેઙ્કટેશકવચસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : shrIveMkaTeshakavachastotram

File name : veMkaTeshakavachastotram.itx

Category : vishhnu, venkateshwara, stotra

Location : doc_vishhnu

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : Venkatesha Kavyakalapa

Latest update : June 10, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

આગ્નેયપુરાણે
અસ્ય શ્રીવેઙ્કટેશકવચસ્તોત્રમહામન્ત્રસ્ય બ્રહ્મા ઋષિઃ
ગાયત્રી છન્દઃ શ્રીવેઙ્કટેશ્વરો દેવતા ।
ૐ બીજં હ્રીં શક્તિઃ ક્લીં કીલકમ્ । ઇષ્ટાર્થે વિનિયોગઃ ।
ધ્યાનમ્
ધ્યાયેદ્વેઙ્કટનાયકં કરયુગે શઙ્ખં ચ ચક્રં મુદા [ગદા]
ચાન્યે [ચાદ્ય] પાણિયુગે વરં કટિતટે વિભ્રાણમર્કચ્છવિમ્ ।
દેવં દેવશિખામણિં શ્રિયમથો વક્ષોદધાનં હરિં
ભૂષાજાલમનેકરત્નખચિતં દિવ્યં કિરીટાઙ્ગદમ્ ॥ ૧॥

વરાહઃ પાતુ મે શીર્ષં કેશાન્ શ્રીવેંઙ્કટેશ્વરઃ ।
શિખામિળાપતિઃ કર્ણૌ લલાટં દિવ્યવિગ્રહઃ ॥ ૨॥

નેત્રે યુગાન્તસ્થાયી મે કપોલે કનકામ્બરઃ ।
નાસિકામિન્દિરાનાથો વક્ત્રં બ્રહ્માદિવન્દિતઃ ॥ ૩॥

ચુબુકં કામદઃ કણ્ઠમગસ્ત્યાભીષ્ટદાયકઃ ।
અંસૌ કંસાન્તકઃ પાતુ કમઠસ્સ્તનમણ્ડલે ॥ ૪॥

હૃત્પદ્મં પાત્વદીનાત્મા કુક્ષિં કાલામ્બરદ્યુતિઃ ।
કટિં કોલવપુઃ પાતુ ગુહ્યં કમલકોશભૃત્ ॥ ૫॥

નાભિં પદ્માપતિઃ પાતુ કરૌ કલ્મષનાશનઃ ।
અઙ્ગુલીર્હેમશૈલેન્દ્રો નખરાનમ્બરદ્યુતિઃ ॥ ૬॥

ઊરૂ તુમ્બુરુગાનજ્ઞો જાનુની શઙ્ખચક્રભૃત્ ।
પાદૌ પદ્મેક્ષણઃ પાતુ ગુલ્ફૌ ચાકાશગાઙ્ગદઃ ॥ ૭॥

દિશો દિક્પાલવન્દ્યાઙ્ઘ્રિર્ભાર્યાં પાણ્ડવતીર્થગઃ ।
અવ્યાત્પુત્રાન્ શ્રીનિવાસઃ સર્વકાર્યાણિ ગોત્રરાટ્ ॥ ૮॥

વેઙ્કટેશઃ સદા પાતુ મદ્ભાગ્યં દેવપૂજિતઃ ।
કુમારધારિકાવાસો ભક્તાભીષ્ટાભયપ્રદઃ ॥ ૯॥

શઙ્ખાભયપ્રદાતા તુ શમ્ભુસેવિતપાદુકઃ ।
વાઞ્છિતં વરદો દદ્યાદ્વેઙ્કટાદ્રિશિખામણિઃ ॥ ૧૦॥

શ્વેતવારાહરૂપોઽયં દિનરાત્રિસ્વરૂપવાન્ ।

રક્ષેન્માં કમલનાથઃ સર્વદા પાતુ વામનઃ ॥ ૧૧॥

શ્રીનિવાસસ્ય કવચં ત્રિસન્ધ્યં ભક્તિમાન્ પઠેત્ ।
તસ્મિન્ શ્રીવેઙ્કટાધીશઃ પ્રસન્નો ભવતિ ધ્રુવમ્ ॥ ૧૨॥

આપત્કાલે જપેદ્યસ્તુ શાન્તિમાયાત્યુપદ્રવાત્ ।
રોગાઃ પ્રશમનં યાન્તિ ત્રિર્જપેદ્ભાનુવાસરે ॥ ૧૩॥

સર્વસિદ્ધિમવાપ્નોતિ વિષ્ણુસાયુજ્યમાપ્નુયાત્ ।

॥ ઇતિ શ્રીમદાગ્નેયપુરાણે વેઙ્કટાચલમાહાત્મ્યે વસિષ્ટનારદસંવાદે
વેઙ્કટેશદિવ્યકવચસ્તોત્રં નામ પઞ્ચદશોઽધ્યાયઃ ॥

From a telugu book veNkaTeshakAvyakalApa
Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

---

.. shrIve NkaTeshakavachastotram ..
Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996
on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*